National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 182-184
© 2025 NJHSR
www.sanskritarticle.com

**Dr.Monojit Mukherjee**
Phd.From Jwaharlal Nehru-
University, New Delhi

**Correspondence:**
**Dr.Monojit Mukherjee**
Phd.From Jwaharlal Nehru-
University, New Delhi

# अद्वैतवेदान्तदिशा जीवस्वरूपप्रतिपादनम्

**Dr.Monojit Mukherjee**

## भूमिका

जीवः इति शब्दः प्राणार्थे क प्रत्यये सति जीवः शब्दः भवति। अद्वैतवेदान्तदर्शने जीवः द्विधा विभज्यते यथा- परमात्मा जीवात्मा चेति, अनयो जीवात्मा इत्युक्ते जीवेन सह आत्मा इति योजयित्वा जीवात्मा इति शब्दः भवति अर्थात् आत्मना सह जीवः उत देहः इन्द्रियः मन इति एभिः उपाधिभिः साकम् संयुज्य जीवः भवति[1] उत जीवेषु अन्तःकरणानि विविधेषु नामसु भिद्यन्ते, यथा- चित्तं पञ्चज्ञानेन्द्रियाणि, मनः, बुद्धिः, अहघङ्कारः, च अन्तःकरणैः सह संयुज्य चैतन्यं अर्थात् अन्तःकरणावच्छिन्नचैतन्यं जीवः इत्युच्यते। अयं जीवः नित्यः विनाशी च। अस्मिन् जगति ब्रह्म अस्ति अस्य प्रमाणस्वरूपेण जीवाः नानारूपेण दृश्यन्ते, कुत्रचिद् पशुरूपेण, कुत्रचिद् मनुष्यरूपेण च। अस्य जीवस्य उत्पत्ति ब्रह्मणः एव भवति।[2]

अयः जीवः विविधिभिः उपाधिभिः संयुज्यन्ते यथा- पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, बुद्धिः, अहङ्कारः, चित्तं, इत्यादयः। अस्मिन् जगति ब्रह्म तु न दृश्यते, परन्तु जीवरूपेण व्यवहारिकत्त्वात् ब्रह्म दृश्यन्ते।

अद्वैतवेदान्तदर्शने कुत्रचिद् उल्लिखितं वर्त्तते जीवः ब्रह्मणः परिणमते, अर्थात् जीवः परिणामरूपेण पर्यवस्यते, तर्हि ब्रह्म सविशेषमेव। अतः परिणामवादस्य लक्षणसन्दर्भे अत्र उक्तं वर्त्तते उपादानसमसत्ताकोकार्यापत्तिः।[3]

## विषयः

जीवोत्पत्तिविषये माण्डूक्योपनिषदि दृष्टान्तोऽस्ति आत्मा आकाशवत् भवति, सः घटाकाशवत् जीवरूपेण उत्पद्यते, यथा-

**आत्मा ह्याकाशवज्जीवैः घटाकाशैरिवोदितः।**
**घटादिवच्च संघातैर्जातावेतन्निदर्शनम्।।**[4]

पुनः माण्डूक्योपनिषदि जीवविलीनस्य दृष्टान्तः उच्यते, यत् घटादिः लीयते चेत् घटाकाशादि महाकाशे लीयते, तथैव जीवो{पि आत्मनि लीयते, यथा-

**'घटादिषु प्रलीनेषु घटाकाशादयो यथा।**
**आकाशे संप्रलीयन्ते तद्वज्जीवा इहात्मनि।।**[5]

माण्डूक्योपनिषदि व्यवहारिकजीवस्य भेदर्सन्दभे उच्यते, यत् भिन्नाकाशादयः रूपकार्यनामभिः भिद्यन्ते, परन्तु आकाशे न कोऽपि भेदोऽस्ति। यथा-

**रूपकार्यसमाख्याश्य भिद्यन्ते तत्र तत्र वै।**
**आकाशस्य न भेदो{स्ति तद्वज्जीवेषु।।**[6]

जीवस्य संसारः बन्धनं तथा मोक्षकारणं इत्यस्य सन्दर्भे आलोच्यते, जीवाः परमात्मा भिन्नरूपेण अङ्गीकृत्य एषु भूतेषु महति ब्रह्मचक्रे भ्रामन्ति, यदा जीवब्रह्मणोः अभेदः जायते, तदा अमृतं लभ्यते। यथा-

**'सर्वाजीवे सर्वसंस्थे बृहन्ते**
**अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।**

**पृथगात्मानं प्रेरितारं च मत्वा**
**जुष्टस्ततस्तेनामृतत्वमेति'।।**[7]

ईश्वरः जीवः प्रकृति इति एषां विलक्षणत्वं तत्त्वज्ञानात् मोक्षः अनयोः सन्दर्भे आलोच्यते। अस्मिन् जगति ईश्वरः सर्वज्ञः, जीवः अज्ञः च द्वावपि अजन्मा इति केवलं प्रकृत्या जीव भुक्तं भवति। आत्मा अनन्तः अकर्त्ता च इति। यदा ईश्वरजीवप्रकृति इमे ब्रह्म अनुभूयन्ते तदा जीवः कृतकृत्यं भवति। यथा-

**'ज्ञाज्ञौ द्वावजावीशनीशा-**
**वजा ह्येका भोक्तृभोग्यार्थयुक्ता।**
**अनन्तश्चात्मा विश्वरूपो ह्यकर्ता**
**त्रयं यदा विदन्ते ब्रह्ममेतत्'।।**[8]

पुनः श्वेताश्वतरोपनिषदि प्रकृतिः जीवः, च अनयो सम्बन्धः आलोच्यते यथा प्रजाः उत्पद्यन्ते, तया अर्थात् प्रकृत्या अजः अर्थात् जीवः भुज्यते, अपराजः भुक्तभोगः त्यजति। यथा-

**'अजामेकां लोहितशुक्लकृष्णां**
**बह्वीः प्रजाः सृज्यमानां सरूपाः।**
**अजो ह्येको जुषमाणो{नुशेते**
**जहात्येना भुक्तभोगामजोऽन्यः'।।**[9]

पुनः जीवेश्वरयो विलक्षणत्वं उच्यते, तव एकस्मिन् वृक्षे सखाद्वयं वर्त्तते, एकेन फ्रफ़लं भुक्तं भवति, अपरः तत् दृश्यते, यथा-

**'द्वा सुपर्णा सयुजा सखाया**
**समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्य-**
**नश्नन्नयो अभिचाकशीति'।।**[10]

इतोऽपि उल्लिखितं वर्त्तते, एकस्मिन् एव वृक्षे जीवः दीनभावात् शोचति। यस्मिन् समये जीवैः ईश्वरस्य महिमा अनुभूयते, तस्मिन् समये शोकात् मुच्यते, यथा-

**'समाने वृक्षे पुरुषो निमग्नो-**
**ऽनीशया शोचति मुह्यमानः।**
**जुष्टं यदा पश्यत्यन्यमीश-**
**मस्य महिमानमिति वीतशोकः।।**[11]

पुनः श्वेताश्वतरोपनिषदि कर्त्तृत्वादिधर्मैः साकं संयुज्यमानः जीवात्मा आलोच्यते, यै गुणैः साकं सम्बद्धयते एवं च कर्मणः फ्रफ़लं भुज्यते, ते जीवा भिन्नरूपविशिष्टाः गुणत्रयविशिष्टाः स्वकर्मानुसारं गम्यते च। यथा-

**'गुणान्वयो यः फ्रफ़लकर्मकर्त्ता**
**कृतस्य तस्यैव स चोपभोक्ता।**
**स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा**
**प्राणाधिपः संचरति स्वकर्मभिः'।।**[12]

पुनः आलोच्यते यत् यः अघ्गु"सदृशं, सूर्यवत् ज्योतिस्वरूपं अहघङ्कारैः साकं युक्तं भवति, यथा-

**'अङ्गुष्टमात्रोरवितुल्यरूपः**
**सङ्कल्पाहघङ्कारसमन्वितो यः।**
**बुद्धेर्गुणेनात्मगुणेन चैव**
**आरग्रमात्रे ह्यपरोऽपि दृष्टः'।।**[13]

**उपसंहारः**

एतावता कः सिद्धान्तः आयाति यत् जीवः ब्रह्मणः भिन्नः, जीवः सादिः, अनन्तश्च, जीवः कर्त्तृत्वभोक्तृत्वसुखदुःखविशिष्टः, अपरस्मिन् दिशि ब्रह्मणि कर्त्तृत्वभोक्तृत्वं च नास्ति, अनात्मनः धर्माः जीवेषु वर्त्तन्ते, ब्रह्म पारमार्थिकत्वात् न अनुभूयते, परन्तु व्यवहारिकदशायां अनुभूयते अविद्याकारणवशात्। जीवस्य कर्त्तव्यं सर्वदा ईश्वराधीनं भवति। अविद्यया ब्रह्म जीवरूपेण पर्यवस्यते। अद्वैतवेदान्तदर्शने ब्रह्म बिम्ब इति आख्यायते, जीवः तस्य अर्थात् ब्रह्मणः प्रतिबिम्बः इति आख्यायते, पुनः शुक्तौ यथा रजतस्य भ्रमो जायते तथैव ब्रह्मणि जीवस्य भ्रमो जायते यदा अविद्याया नाशो भवति तदा भ्रमो नश्यति, ब्रह्म कुटस्थं भवति। आत्मा बुद्धौ प्रतिबिम्बते चेत् जीवभावः प्राप्यते। विज्ञानमयकोशावच्छिन्नचिदात्मा जीवः इत्युच्यते। जीवः ब्रह्मणः न अंश, न अवयव भवति, स ब्रह्मणः रूपान्तरं भवति।

**ग्रन्थसूची**


अद्वैतसिद्धिः- मधुसूदनसरस्वतीकृता- चौखम्बासंस्कृतसीरीज, वाराणसी, 2011

- ईशादि नौ उपनिषद्- गीताप्रेस, गोरखपुर, 2012
- ब्रह्मसूत्रम्- वादरायणकृतं- मोतिलाल बनारसी दास, नवदेहली, 2003
- ब्रह्मसूत्रशाङ्करभाष्यद्वितीयाध्यायः- शङ्कराचार्यकृतः- मोतिलाल वणारसी दास, नवदेहली, 2009
- ब्रह्मसूत्रशाङ्करभाष्यरत्नप्रभाटीका- गोविन्दानन्दकृता- भारतीय बुक कर्पोरेशन, नवदेहली, 2010
- ललिताव्याख्योपेतन्यायमालाशाङ्करभाष्यसम्बलितसूत्रम्- कैलाशपीठाधीश्वरपरमा- दर्शाचार्यमहामण्डलेश्वरानन्तश्रीविभूषितस्वामीविद्या- नन्दगिरिराजः- कैलाशविद्या प्रकाशनम्, 2001
- वेदान्तपरिभाषा-धर्मराजाध्वरीन्द्रप्रणीता- चौखम्बासंस्कृतसीरीज, वाराणसी, 2011
- वेदान्तसारः- सदानन्दयोगीन्द्रप्रणीतः- मोतिलाल वनारसी दास, वाराणसी, 2009
- श्रीमद्भगवद्गीता- गीताप्रेस, गोरखपुर, 2008

- श्रीमद्भगवद्गीताशाङ्करभाष्यम्- शङ्कराचार्यकृतम्, गीताप्रेस, गोरखपुर, 2002

**आंग्लोग्रन्थाः**

*Ananda Lahari* by Sankaracharya. Sharada Sanskrit Sansthan, Varanasi, 2008

*Atmabodha* by sankaracharya. Ramakrishna Matha, Chennai, 1947

*Brahmasutraanuvruti* by Jaynendra Saraswati. Sankar-acharya vidyapitham, Varanasi, 1987

*The Brahmasutra and their principal commentary* by V.M Apte Munshiram Manoharlal, pvt. Ltd, 2001

*Upanishads* by F. Max. Muellar. Prakash Books India Pvt. Ltd. 2001

*Vedantadarshan* by Vyasadeva. Gita press, Gorakhpur, 2013

*Vedantaparibhasha* by Dharmaraja Adhvarindra Choukhamba Sanskrit series, Varanasi, 1990

*Vedantasara* by Sadananda. Advaita Ashrama, Almora, 1931

*Vivek Chudamani.* By Sankaracharya. Gita press, Gorakhpur, 2015

**कोशग्रन्थाः**

- अमरकोशः- अमरसिंहकृतः, निर्णयसागरप्रेस, बम्बई, 1961
- वाचस्पत्यम्- चौखम्बा संस्कृतग्रन्थमाला, वाराणसी, 1968
- *Encyclopaedia of Indian philosophy* by Karl H. Potter, Motilal Banarasi Das, Delhi, 1970
- *English-Sanskrit dictionary* by Monier William. Munshiram Manoharlal Das, Delhi, 1976.

**E Sources-**

www.google.com

www.indiacat.in

www.jnu.ac.in

www.worldcat.in